# shrImad gItAsAraH

# શ્રીમદ્ ગીતાસારઃ

## Document Information

Text title : shrImadgItAsAra

File name : shrImadgItAsAra.itx

Category : gItA, giitaa, bhagavadgItA

Location : doc_giitaa

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : May 18, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીમદ્ ગીતાસારઃ

શ્રીભગવાનુવાચ –
ગીતાસારં પ્રવક્ષ્યામિ અર્જુનાયોદિતં પુરા ।
અષ્ટાઙ્ગયોગયુક્તાત્મા સર્વવેદાન્તપારગઃ ॥ ૧॥

આત્મલાભઃ પરો નાન્ય આત્મા દેહાદિવર્જિતઃ।
રૂપાદિહીનો દેહાન્તઃકરણત્વાદિલોચનમ્ ॥ ૨॥

વિજ્ઞાનરહિતઃ પ્રાણઃ સુષુપ્તોઽહં પ્રતીયતે ।
નાહમાત્મા ચ દુઃખાદિ સંસારાદિસમન્વયાત્ ॥ ૩॥

વિધૂમ ઇવ દીપ્તાર્ચિરાદીપ્ત ઇવ દીપ્તિમાન્ ।
વૈદ્યુતોઽગ્નિરિવાકાશે હૃત્સઙ્ગે આત્મનાઽઽત્મનિ ॥ ૪॥

શ્રોત્રાદીનિ ન પશ્યન્તિ સ્વં સ્વમાત્માનમાત્મના ।
સર્વજ્ઞઃ સર્વદર્શી ચ ક્ષેત્રજ્ઞસ્તાનિ પશ્યતિ ॥ ૫॥

સદા પ્રકાશતે હ્યાત્મા પટે દીપો જ્વલન્નિવ ।
જ્ઞાનમુત્પદ્યતે પુંસાં ક્ષયાત્ પાપસ્ય કર્મણઃ ॥ ૬॥

યથાદર્શતલપ્રખ્યે પશ્યત્યાત્માનમાત્મનિ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થાંશ્ચ મહાભૂતાનિ પઞ્ચકમ્ ॥ ૭॥

મનોબુદ્ધિરહઙ્કારમવ્યક્તં પુરુષસ્તથા ।
પ્રસંખ્યાનપરાવ્યાપ્તો વિમુક્તો બન્ધનૈર્ભવેત્ ॥ ૮॥

ઇન્દ્રિયગ્રામમખિલં મનસાભિનિવેશ્ય ચ ।
મનશ્ચૈવાપ્યહઙ્કારે પ્રતિષ્ઠાપ્ય ચ પાણ્ડવ ॥ ૯॥

અહઙ્કારં તથા બુદ્ધૌ બુદ્ધિં ચ પ્રકૃતાવપિ ।
પ્રકૃતિં પુરુષે સ્થાપ્ય પુરુષં બ્રહ્મણિ ન્યસેત્ ॥ ૧૦॥

નવદ્વારમિદં ગેહં તિસૃણાં પઞ્ચસાક્ષિકમ્ ।

ક્ષેત્રજ્ઞાધિષ્ઠિતં વિદ્વાન્ યો વેદ સ પરઃ કવિઃ ॥ ૧૧॥

અશ્વમેધસહસ્રાણિ વાજપેયશતાનિ ચ ।
જ્ઞાનયજ્ઞસ્ય સર્વાણિ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૧૨॥

શ્રીભગવાનુવાચ –
યમશ્ચ નિયમઃ પાર્થ આસનં પ્રાણસંયમઃ ।
પ્રત્યાહારસ્તથા ધ્યાનં ધારણાર્જુન સપ્તમી ।
સમાધિવિધિ ચાષ્ટાઙ્ગો યોગ ઉક્તો વિમુક્તયે ॥ ૧૩॥

કાયેન મનસા વાચા સર્વભુતેષુ સર્વદા ।
હિંસાવિરામકો ધર્મો હ્યહિંસા પરમં સુખમ્ ॥ ૧૪॥

વિધિના યા ભવેદ્ધિંસા સા ત્વહિંસા પ્રકીર્તિતા ।
સત્યં બ્રૂયાત્ પ્રિયં બ્રૂયાન્ન બ્રૂયાત્સત્યમપ્રિયમ્ ।
પ્રિયં ચ નાનૃતં બ્રૂયાદેષ ધર્મઃ સનાતનઃ ॥ ૧૫॥

યચ્ચ દ્રવ્યાપહરણં ચૌર્યાદ્વાથ બલેન વા ।
સ્તેયં તસ્યાનાચરણં અસ્તેયં ધર્મસાધનમ્ ॥ ૧૬॥

કર્મણા મનસા વાચા સર્વાવસ્થાસુ સર્વદા।
સર્વત્ર મૈથુનત્યાગં બ્રહ્મચર્યં પ્રચક્ષતે ॥ ૧૭॥

દ્રવ્યાણામપ્યનાદાનમાપત્સ્વપિ તથેચ્છયા ।
અપરિગ્રહમિત્યાહુસ્તં પ્રયત્નેન વર્જયેત્ ॥ ૧૮॥

દ્વિધા શૌચં મૃજ્જલાભ્યાં બાહ્યં ભાવાદથાન્તરમ્।
યદૃચ્છાલાભતસ્તુષ્ટિઃ સન્તોષઃ સુખલક્ષણમ્ ॥ ૧૯॥

મનસશ્ચેન્દ્રિયાણાં ચ ઐકાગ્ર્યં પરમં તપઃ ।
શરીરશોષણં વાપિ કૃચ્છ્રચાન્દ્રાયણાદિભિઃ ॥ ૨૦॥

વેદાન્તશતરુદ્રીયપ્રણવાદિ જપં બુધાઃ ।
સત્ત્વશુદ્ધિકરં પુંસાં સ્વાધ્યાયં પરિચક્ષતે ॥ ૨૧॥

સ્તુતિસ્મરણપૂજાદિ વાઙ્મનઃકાયકર્મભિઃ ।
અનિશ્ચલા હરૌ ભક્તિરેતદીશ્વરચિન્તનમ્ ॥ ૨૨॥

આસનં સ્વસ્તિકં પ્રોક્તં પદ્મમર્ધાસનસ્તથા ।
પ્રાણઃ સ્વદેહજો વાયુરારામસ્તન્નિરોધનમ્ ॥ ૨૩॥

ઇન્દ્રિયાણાં વિચરતાં વિષયેષુ ત્વસત્સ્વિવ ।
નિરોધઃ પ્રોચ્યતે સદ્ભિઃ પ્રત્યાહારસ્તુ પાણ્ડવ ॥ ૨૪॥

મૂર્તામૂર્તબ્રહ્મરૂપચિન્તનં ધ્યાનમુચ્યતે ।
યોગારમ્ભે મૂર્તહરિં અમૂર્તમપિ ચિન્તયેત્ ॥ ૨૫॥

અગ્નિમણ્ડલમધ્યસ્થો વાયુર્દેવશ્ચતુર્ભુજઃ ।
શંખચક્રગદાપદ્મયુક્તઃ કૌસ્તુભસંયુતઃ ॥ ૨૬॥

વનમાલી કૌસ્તુભેન રતોઽહં બ્રહ્મસંજ્ઞકઃ ।
ધારણેત્યુચ્યતે ચેયં ધાર્યતે યન્મનોલયે ॥ ૨૭॥

અહં બ્રહ્મેત્યવસ્થાનં સમાધિરભિધીયતે ।
અહં બ્રહ્માસ્મિ વાક્યાચ્ચ જ્ઞાનાન્મોક્ષો ભવેન્નૃણામ્ ॥ ૨૮॥

શ્રદ્ધયાનન્દચૈતન્યં લક્ષયિત્વા સ્થિતસ્ય ચ ।
બ્રહ્માહમસ્મ્યહં બ્રહ્મ અહં-બ્રહ્મ-પદાર્થયોઃ ॥ ૨૯॥

હરિરુવાચ –
ગીતાસારમિતિ પ્રોક્તં વિધિનાપિ મયા તવ ।
યઃ પઠેત્ શ‍ૃણુયાદ્વાપિ સોઽપિ મોક્ષમવાપ્નુયાત્ ॥ ૩૦॥

ઇતિ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
શ્રીમદ્ગીતાસારઃ સમાપ્તઃ ॥

Encoded and proofread by PSA Easwaran

*shrImad gItAsAraH*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*